# Agastyakrita Parashuramastutih

# અગસ્ત્યકૃતા પરશુરામસ્તુતિઃ

## Document Information

Text title : Agastyakrita Parashuramastutih

File name : agastyakRRitAparashurAmastutiH.itx

Category : vishhnu, dashAvatAra, vishnu

Location : doc_vishhnu

Author : Agastya

Transliterated by : Sudeep Dalbanjan

Proofread by : Sudeep Dalbanjan

Description/comments : bhArgavatantra | adhyAya 1 | 23-40||

Latest update : August 21, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 21, 2024

*sanskritdocuments.org*

# અગસ્ત્યકૃતા પરશુરામસ્તુતિઃ

અગસ્ત્ય ઉવાચ ।
જામદગ્ન્યં તનાલોક્ય રામં સર્વાઙ્ગસુન્દરમ્ ।
મુદા પરમયોપેતઃ શિરસા સમવન્દિષમ્ ॥ ૧॥

કૃત્તો વનસ્પતિરિવ પાતિતો ધરણીતલે ।
વિગ્રહો મે મુનિશ્રેષ્ઠાઃ રામસ્ય પવપદ્મયોઃ ॥ ૨॥

અનુજ્ઞાતઃ સમુત્થાય તોષયામાસ તં પ્રભુમ્ ।
ઉચ્ચૈઃ સ્વરં સમાસાદ્ય પુણ્ડરીકાક્ષવિદ્યયા ॥ ૩॥

જિતન્તે પુણ્ડરીકાક્ષ નમસ્તે વિશ્વભાવન ।
નમસ્તેઽસ્તુ હૃષીકેશ મહાપુરુષપૂર્વજ ॥ ૪॥

નમસ્તે વાસુદેવાય શાન્તાનન્દચિદાત્મને ।
અજિતાય નમસ્તુભ્યં ષાડ્ગુણ્યનિધમે નમઃ ॥ ૫॥

મહાવિભૂતિસંસ્થાય નમસ્તે પુરુષોત્તમ ।
સહસ્રશિરસે તુભ્યં સહસ્રચરણાય તે ॥ ૬॥

સહસ્રબાહવે તુભ્યં સહસ્રનયનાય તે ।
અમૂર્તાય નમસ્તુભ્યમેકમૂર્તાય તે નમઃ ॥ ૭॥

અનેકમૂર્તયે તુભ્યમક્ષરાય ચ તે નમઃ ।
વ્યાપિને વેદવેદ્યાય નમસ્તે પરમાત્મને ॥ ૮॥

ચિન્માત્રરૂપિણે તુભ્યં નમસ્ત્રૈયન્તમૂર્તયે ।
અણિષ્ઠાય સ્થવિષ્ઠાય મહિષ્ઠાય ચ તે નમઃ ॥ ૯॥

નેદિષ્ઠાય દવિષ્ઠાય ક્ષેપિષ્ઠાય ચ તે નમઃ ।
વરિષ્ઠાય વસિષ્ઠાય કનિષ્ઠાય ચ તે નમઃ ॥ ૧૦॥

પઞ્ચાત્મને નમસ્તુભયં સર્વાન્તર્યામિણે નમઃ ।

કલ્પનાક્રોસડરૂપાય સૃષ્ટિસ્થિત્યન્તહેતવે ॥ ૧૧॥

નમસ્તે ગુણરૂપાય ગુણરૂપાનુવર્તિને
વ્યસ્તાય ચ સમસ્તાય સમસ્તવ્યસ્તરૂપિણે ॥ ૧૨॥

આદિમધ્યાન્તશૂન્યાય યદ્વતે ચ નમો નમઃ ।
પ્રણવપ્રતિપાદ્યાય નમઃ પ્રણવરૂપિણે ॥ ૧૩॥

લોકયાત્રાપ્રસિદ્ધ્યર્થં સ્રષ્ટૃબ્રહ્માદિરૂપિણે ।
નમસ્તુભ્યં નૃસિંહાદિમુર્તિભેદાય વિષ્ણવે ॥ ૧૪॥

વિપાકૈઃ કર્મણાં ક્લેશૈરસ્પૃષ્ટવપુષે નમઃ ।
નમો બ્રહ્મણ્યદેવાય તેજસાં નિધયે નમઃ ॥ ૧૫॥

નિત્યાસાધારણાનેકલોકરક્ષાપરિચ્છદે ।
સચ્ચિદાનન્દરૂપાય વરેણ્યાય નમો નમઃ ॥ ૧૬॥

યજમાનાય યજ્ઞાય યષ્ટવ્યાય નમો નમઃ ।
ઇજ્યાફલાત્મને તુભ્યં નમઃ સ્વાધ્યાયશાલિને ॥ ૧૭॥

નમઃ પરમહંસાય નમઃ સર્વગુણાય તે ।
સ્થિતાય પરમે વ્યોમ્નિ ભૂયો ભૂયો નમો નમઃ ॥ ૧૮॥

ઇતિ ભાર્ગવતન્ત્રાન્તર્ગતા અગસ્ત્યકૃતા પરશુરામસ્તુતિઃ સમાપ્તા ।

ભાર્ગવતન્ત્ર । અધ્યાય ૧ । ૨૩-૪૦॥

bhArgavatantra . adhyAya 1 . 23-40..

Encoded and proofread by Sudeep Dalbanjan

*Agastyakrita Parashuramastutih*

pdf was typeset on August 21, 2024

Please send corrections to *sanskrit@cheerful.com*